## पाठ-२

## यदि जानासि तद् वद्

**सारान्शः**

पाठे आगत प्रहेलिकायामेव उत्तराणां समावेशः वर्तते।यथा - कस्तूरी कस्मात् जायते? हरिणात , कः करिणां कुलं हन्ति? सिन्हः, कातरः युद्धात् पलायनम् करोति।तथैव द्वितीय प्रहेलिकायामुक्तम् अस्ति।युद्धिष्ठिरः धर्मस्य पुत्रः ,गङ्गा त्वरिता वहति ,गति हन्सस्य शोभा अस्ति। तृतीय प्रहेलिका अनानास फलस्य वर्णनं करोति।वृक्षाग्रे फलं दृष्टं ,फलाग्रे वृक्ष एव च।तस्य शब्दस्य आदिः अकारेण अन्तः सकारेण भवति।अशोक शब्दम् आधृत्य चतुर्थ प्रहेलिकायाः निर्माणम् अभवत्।यस्य आदौ अकारः,अन्ते ककारः,मध्ये च शो इति वर्तते।तथैव पञ्चम प्रहेलिकायाः आधारः सूर्यः वर्तते।सः नृपवत् रथेन आकाशे संचरति ,सप्त अश्वाः (किरणाः) अस्य रथं नयन्ति। सः सम्राट अस्ति मनुष्यः न। प्राणदाता अस्ति न तु राक्षसः।सारिका इति षष्ठं प्रहेलिकायाः उत्तरम् अस्ति।अस्य मध्ये रि अरि मध्यः नास्ति,अनुरक्तापि सिता अस्ति।यथोक्तवादिन्यापि दूती न ,सुन्दरी कान्तवर्णा च अस्ति।सप्तम प्रहेलिकायाः उत्तरम् वल्मीकः अस्ति।वल्मीके अनेकानि छिद्राणि भवन्ति तस्मिन् सर्पाणां निवासः भवति।अतः अस्य उत्तरं यः जानाति सः बुद्धिमानः एव।अन्तिम प्रहेलिकायाः उत्तरं नयन इति अस्ति।आदौ न ,मध्ये य, अन्ते न, नयनौ सर्वेषां भवतः।

**मुख्य बिन्दवः**

- एताः प्रहेलिकाः अधिकांशतः सुभाषितरत्नभाण्डागारतः संकलिताः। सुभाषितत्नभाण्डागारे विविधानां पद्यानां सूक्तीनां च संग्रहः अस्ति।प्रहेलिकाः तर्कशक्तिं मननक्षमतां च वर्धयन्ति।

- संस्कृत भाषायां पहेली इत्यस्य 'प्रहेलिका' अथवा 'प्रहेलि' इति उच्चारणं भवति- 'प्रहिलति अभिप्रायं सूचयतीति प्रहिल अभिप्राय सूचने क्कुन्दापि अत-इत्वं।' अस्य पर्यायाः प्रवल्हिका, प्रवह्लि, प्रहेली, प्रह्लीका, प्रश्नदूती, तथा प्रवह्ली अस्ति।

**अवगच्छामः**

महाभारतस्य निरन्तरतया लेखन समये महर्षि वेदव्यासः मध्ये मध्ये चिन्तनस्य कृते कूट वाक्यानाम् उच्चारणं कुर्वन् आसन।भगवतः गणपतेः आज्ञा आसीत् कि वाक्यानां सम्यग् अर्थ ज्ञानेन बिना तान् लिपिबद्धः न करणीयमिति। अतः अस्य कथानुसारं तौ(व्यासगणेशौ) प्रहेलिका माध्यमेन यथा समय, यथा साध्य विश्राम अवकाशः च चिन्तन हेतुः अप्राप्यताम्।

**आवश्यकोऽयं ज्ञानम्**

- मुखे हस्तद्वयं धत्ते, सर्वथा जागरूका सा।
  प्रतिक्षणं वदन्तीय, प्राणाः पिंजिताः सदा ।।
  (घटिका)
- आदिस्वरेण ब्रह्माऽहं तापयामि निरन्तरम् ।
  नाहं भीमस्य जामाता, कोऽस्मि शीघ्रं ब्रवीतु मे ।। (अनलः)
- आदौ भा शोभते नित्यम्, रतम् पश्चाद् विराजते।
  देवतानां प्रियं धाम, तवाप्यस्ति ममापि च ।।
  (भारतम्)
- अपदो दूरगामी च साक्षरो न च पण्डितः ।
  अमुखः स्फुटवक्ता च यो जानाति स पण्डितः ।। (पत्रम्)

**व्याकरण बिन्दवः शब्द भण्डाराश्च**

**सर्वनाम -** ते शब्दाः ये संज्ञायाः स्थाने प्रयुक्ताः भवन्ति ते एव सर्वनाम शब्दाः **यथा-** अस्मद् ,युष्मद् ,यत् ,तत् ,एतत् ,इदम् इत्यादयः।

**उदा.**- रामः भोजनं खादति। अस्मिन् वाक्ये रामः संज्ञा शब्दः अस्ति ,अस्य स्थाने सः इत्यस्य प्रयोगः भविष्यति तदा वाक्यः भवति - सः भोजनं खादति।

**प्रश्न निर्माणाय विचारणीय बिन्दवः-**

**सप्त ककाराः -** कति (कितने ,कितना,कितनी), कदा(कब), कुत्र(कहा) ,कथम्(कैसे) , कुतः(कहा से) ,किमर्थम्(क्यो,किसलिये)

**शब्दार्थाः -**

| | |
|---|---|
| कातरः | कायर |
| त्वरिता | तेज |

| | |
|---|---|
| शोन्तरं | शो बीच मे |
| सम्राट | विशेष चमकदार |
| नितान्त रक्ता | अति अनुरक्ता |
| अनेक सुशिरं | अनेक सुन्दर शिखरो वाला |
| सिता | सफ़ेद |

**योग्यतां वर्धयत**

प्रहेलिकाभिः ज्ञानमपि वर्धते, मनोरंजनम् अपि भवति । प्रहेलिकानां शब्दानाम् अर्थद्वयेन चमत्कारः उत्पद्यते।प्रहेलिकाभिः तर्कशक्तिं मननक्षमतां च वर्धयन्ति । अतः निरन्तर अभ्यासः करणीयः।-

मेघश्यामोऽस्मि नो कृष्णो, महाकायो न पर्वतः ।
बलिष्ठोऽस्मि न भीमोऽस्मि, कोऽस्म्यहं नासिकाकरः ।।उत्तर - हाथी

स्नेहं ददाति यो मह्यं, नित्यं तस्मै ददाम्यहम् ।
ज्योतिः पदार्थज्ञानार्थं, कोऽपि वदतु साम्प्रतम् ।।उत्तर - दीपक

वृक्षाग्रवासी न च पक्षिराजः तृणं च शय्या न च राजयोगी।
सुवर्णकायो न च हेमधातुः पुंसश्च नाम्ना न च राजपुत्रः।।उत्तर - आम

अस्ती कुक्षी शिरो नास्ती बाहु रस्ती निरंगुली।
अहतो नर भक्शीचा यो जनाती स: पंडितः ।।उत्तर - कमीज़

**पद्यानां संप्रेष्यः**

प्रथमप्रहेलिकायाः तात्पर्यम् अस्ति- कस्तूरी मृगात् जायते। सिंहः करिणां कुलं हन्ति। कातरः युद्धे पलायनं कुर्यात् इति।
द्वितीयप्रहेलिकायाः तात्पर्यम् अस्ति - युधिष्ठिरः धर्मस्य पुत्रः, गंगा त्वरिता वहति,हंसस्य शोभा गतिः अस्ति ।
तृतीयप्रहेलिकायाः उत्तरमस्ति- 'अनानास' इति । यतः अनानासवृक्षस्य उपरि भवति, पुनः तस्य उपरि वृक्षः (पत्राणि) भवन्ति।
चतुर्थप्रहेलिकायाः उत्तरमस्ति 'अशोकः' यतः यस्य (शब्दस्य) पूर्वे 'अकारः' वर्तते, मध्ये 'शो' वर्णः अन्ते च 'क' वर्णः विद्यते ।
पंचमप्रहेलिकायाः उत्तरमस्ति 'सूर्यः' । यः नित्यं रथेन गच्छति । तस्य किरणाः एव अश्वाः । देदीप्यमानः सम्राट् अस्ति। सः संसारस्य कृते असुरः प्राणदायकः अपि अस्ति ।
षष्ठप्रहेलिकायाः उत्तरमस्ति 'सारिका' । यतः सा दूती इव वदति । अयमेव शब्दः यस्य मध्ये 'रि' वर्णः भवति, अन्ते च 'का' वर्णः भवति ।
सप्तम प्रहेलिकायाः उत्तरमस्ति 'वल्मीकम्' इति यतः यस्य शब्दस्य आदौ 'व' अस्ति अन्ते च ककारः अस्ति। एतस्मिन् अनेकानि छिद्राणि भवन्ति, सर्पः च तत् इच्छेत्।तस्य नाम ऋषिनामवत् एव।
अष्टम प्रहेलिकायाः उत्तरमस्ति- 'नयन' इति । यस्य आदौ 'न' वर्णः, अन्तेऽपि 'न' वर्णः, मध्ये च 'य' वर्णः भवति, यत् च सर्वेषाम् अङ्गं भवति । अस्य अर्थः 'नेत्रम्' इति ।

**अधिकाङ्कानाम् अर्जनं कथं भवेत्**

- पद्यानां (प्रहेलिकानां) सम्यक् रूपेण अध्ययनं कृत्वा तेषाम् अर्थम् अवगच्छेत्।
- पद्येषु आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात्।
- पद्यानां समान पद्यसूक्त्यादिनाम् अपि जानीयात्।
- प्रहेलिकानाम् अभ्यासं कुर्यात् ।

**स्व मूल्याङ्कनम् कुरुत**

- श्लोकानां अर्थम् अवगम्य अन्य प्रहेलिकानां अन्वेषणं कृत्वा उत्तरं दीयताम्।
- सर्वनाम शब्दानां सहयोगेन वाक्य निर्माणम् कुरुत।
- सर्वनाम शब्दानां रूपाणि कण्ठस्थं कुरुत।